# ShaDjagItA

# ષડ્જગીતા

## Document Information

```
Text title : ShaDjagItA
File name : shhaDjagiitaa.itx
Category : gItA, giitaa
Location : doc_giitaa
Transliterated by : Professor Tokunaga in Kyoto system(?)
Proofread by : Sunder Hattangadi
Latest update : June 2, 1998
Send corrections to : sanskrit@cheerful.com
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

SahDjagItA

# ષડ્જગીતા

અધ્યાયઃ ૧૬૧

વ્

ઇત્યુક્તવતિ ભીષ્મે તુ તૂષ્ણી ભૂતે યુધિષ્ઠિરઃ ।
પપ્રચ્છાવસરં ગત્વા ભ્રાતૄન્વિદુર પઞ્ચમાન્ ॥ ૧॥

ધર્મે ચાર્થે ચ કામે ચ લોકવૃત્તિઃ સમાહિતા ।
તેષાં ગરીયાન્કતમો મધ્યમઃ કો લઘુશ્ચ કઃ ॥ ૨॥

કસ્મિંશ્ચાત્મા નિયન્તવ્યસ્ત્રિવર્ગવિજયાય વૈ ।
સન્તુષ્ટા નૈષ્ઠિકં વાક્યં યથાવદ્વક્તુમર્હથ ॥ ૩॥

તતોઽર્થગતિતત્ત્વજ્ઞઃ પ્રથમં પ્રતિભાનવાન્ ।
જગાદ વિદુરો વાક્યં ધર્મશાસ્ત્રમનુસ્મરન્ ॥ ૪॥

બાહુશ્રુત્યં તપસ્ત્યાગઃ શ્રદ્ધા યજ્ઞક્રિયા ક્ષમા ।
ભાવશુદ્ધિર્દયા સત્યં સંયમશ્ચાત્મસમ્પદઃ ॥ ૫॥

એતદેવાભિપદ્યસ્વ મા તે ભૂચ્ચલિતં મનઃ ।
એતન્મૂલૌ હિ ધર્માર્થાવેતદેકપદં હિતમ્ ॥ ૬॥

ધર્મેણૈવર્ષયસ્તીર્ણા ધર્મે લોકાઃ પ્રતિષ્ઠિતાઃ ।
ધર્મેણ દેવા દિવિગા ધર્મે ચાર્થઃ સમાહિતઃ ॥ ૭॥

ધર્મો રાજન્ગુણશ્રેષ્ઠો મધ્યમો હ્યર્થ ઉચ્યતે ।
કામો યવીયાનિતિ ચ પ્રવદન્તિ મનીષિણઃ ।
તસ્માદ્ધર્મપ્રધાનેન ભવિતવ્યં યતાત્મના ॥ ૮॥

સમાપ્તવચને તસ્મિન્નર્થશાસ્ત્રવિશારદઃ ।
પાર્થો વાક્યાર્થતત્ત્વજ્ઞો જગૌ વાક્યમતન્દ્રિતઃ ॥ ૯॥

કર્મભૂમિરિયં રાજન્નિહ વાર્તા પ્રશસ્યતે ।

કૃષિવાણિજ્ય ગોરક્ષ્યં શિલ્પાનિ વિવિધાનિ ચ ॥ ૧૦॥

અર્થ ઇત્યેવ સર્વેષાં કર્મણામવ્યતિક્રમઃ ।
ન ઋતેઽર્થેન વર્તેતે ધર્મકામાવિતિ શ્રુતિઃ ॥ ૧૧॥

વિજયી હ્યર્થવાન્ધર્મમારાધયિતુમુત્તમમ્ ।
કામં ચ ચરિતું શક્તો દુષ્પ્રાપમકૃતાત્મભિઃ ॥ ૧૨॥

અર્થસ્યાવયવાવેતૌ ધર્મકામાવિતિ શ્રુતિઃ ।
અર્થસિદ્ધ્યા હિ નિર્વૃત્તાવુભાવેતૌ ભવિષ્યતઃ ॥ ૧૩॥

ઉદ્ભૂતાર્થં હિ પુરુષં વિશિષ્ટતર યોનયઃ ।
બ્રહ્માણમિવ ભૂતાનિ સતતં પર્યુપાસતે ॥ ૧૪॥

જટાજિનધરા દાન્તાઃ પઙ્કદિગ્ધા જિતેન્દ્રિયાઃ ।
મુણ્ડા નિસ્તન્તવશ્ચાપિ વસન્ત્યર્થાર્થિનઃ પૃથક્ ॥ ૧૫॥

કાષાયવસનાશ્ચાન્યે શ્મશ્રુલા હ્રીસુસંવૃતાઃ ।
વિદ્વાંસશ્ચૈવ શાન્તાશ્ચ મુક્તાઃ સર્વપરિગ્રહૈઃ ॥ ૧૬॥

અર્થાર્થિનઃ સન્તિ કે ચિદપરે સ્વર્ગકાઙ્ક્ષિણઃ ।
કુલપ્રત્યાગમાશ્ચૈકે સ્વં સ્વં માર્ગમનુષ્ઠિતાઃ ॥ ૧૭॥

આસ્તિકા નાસ્તિકાશ્ચૈવ નિયતાઃ સંયમે પરે ।
અપ્રજ્ઞાનં તમો ભૂતં પ્રજ્ઞાનં તુ પ્રકાશતા ॥ ૧૮॥

ભૃત્યાન્ભોગૈર્દ્વિષો દણ્ડૈર્યો યોજયતિ સોઽર્થવાન્ ।
એતન્મતિમતાં શ્રેષ્ઠ મતં મમ યથાતથમ્ ।
અનયોસ્તુ નિબોધ ત્વં વચનં વાક્યકણ્ઠયોઃ ॥ ૧૯॥

તતો ધર્માર્થકુશલૌ માદ્રીપુત્રાવનન્તરમ્ ।
નકુલઃ સહદેવશ્ચ વાક્યં જગદતુઃ પરમ્ ॥ ૨૦॥

આસીનશ્ચ શયાનશ્ચ વિચરન્નપિ ચ સ્થિતઃ ।
અર્થયોગં દૃઢં કુર્યાદ્યોગૈરુચ્ચાવચૈરપિ ॥ ૨૧॥

અસ્મિંસ્તુ વૈ સુસંવૃત્તે દુર્લભે પરમપ્રિય ।
ઇહ કામાનવાપ્નોતિ પ્રત્યક્ષં નાત્ર સંશયઃ ॥ ૨૨॥

યોઽર્થો ધર્મેણ સંયુક્તો ધર્મો યશ્ચાર્થસંયુતઃ ।
મધ્વિવામૃત સંયુક્તં તસ્માદેતૌ મતાવિહ ॥ ૨૩॥

અનર્થસ્ય ન કામોઽસ્તિ તથાર્થોઽધર્મિણઃ કુતઃ ।
તસ્માદુદ્વિજતે લોકો ધર્માર્થાદ્યો બહિષ્કૃતઃ ॥ ૨૪॥

તસ્માદ્ધર્મપ્રધાનેન સાધ્યોઽર્થઃ સંયતાત્મના ।
વિશ્વસ્તેષુ ચ ભૂતેષુ કલ્પતે સર્વ એવ હિ ॥ ૨૫॥

ધર્મં સમાચરેત્પૂર્વં તથાર્થં ધર્મસંયુતમ્ ।
તતઃ કામં ચરેત્પશ્ચાત્સિદ્ધાર્થસ્ય હિ તત્ફલમ્ ॥ ૨૬॥

વિરેમતુસ્તુ તદ્વાક્યમુક્ત્વા તાવશ્વિનોઃ સુતૌ ।
ભીમસેનસ્તદા વાક્યમિદં વક્તું પ્રચક્રમે ॥ ૨૭॥

નાકામઃ કામયત્યર્થં નાકામો ધર્મમિચ્છતિ ।
નાકામઃ કામયાનોઽસ્તિ તસ્માત્કામો વિશિષ્યતે ॥ ૨૮॥

કામેન યુક્તા ઋષયસ્તપસ્યેવ સમાહિતાઃ ।
પલાશફલમૂલાશા વાયુભક્ષાઃ સુસંયતાઃ ॥ ૨૯॥

વેદોપવાદેષ્વપરે યુક્તાઃ સ્વાધ્યાયપારગાઃ ।
શ્રાદ્ધયજ્ઞક્રિયાયાં ચ તથા દાનપ્રતિગ્રહે ॥ ૩૦॥

વણિજઃ કર્ષકા ગોપાઃ કારવઃ શિલ્પિનસ્તથા ।
દૈવકર્મ કૃતશ્ચૈવ યુક્તાઃ કામેન કર્મસુ ॥ ૩૧॥

સમુદ્રં ચાવિશન્ત્યન્યે નરાઃ કામેન સંયુતાઃ ।
કામો હિ વિવિધાકારઃ સર્વં કામેન સન્તતમ્ ॥ ૩૨॥

નાસ્તિ નાસીન્નાભવિષ્યદ્ભૂતં કામાત્મકાત્પરમ્ ।
એતત્સારં મહારાજ ધર્માર્થાવત્ર સંશ્રિતૌ ॥ ૩૩॥

નવ નીતં યથા દધ્નસ્તથા કામોઽર્થધર્મતઃ ।
શ્રેયસ્તૈલં ચ પિણ્યાકાદ્ધૃતં શ્રેય ઉદશ્વિતઃ ॥ ૩૪॥

શ્રેયઃ પુષ્પફલં કાષ્ઠાત્કામો ધર્માર્થયોર્વરઃ ।
પુષ્પિતો મધ્વિવ રસઃ કામાત્સઞ્જાયતે સુખમ્ ॥ ૩૫॥

સુચારુ વેષાભિરલઙ્કૃતાભિર્
મદોત્કટાભિઃ પ્રિયવાદિનીભિઃ ।
રમસ્વ યોષાભિરુપેત્ય કામં

કામો હિ રાજંસ્તરસાભિપાતી ॥ ૩૬॥

બુદ્ધિર્મમૈષા પરિષત્સ્થિતસ્ય
મા ભૂદ્વિચારસ્તવ ધર્મપુત્ર ।
સ્યાત્સંહિતં સદ્ભિરફલ્ગુસારં
સમેત્ય વાક્યં પરમાનૃશંસ્યમ્ ॥ ૩૭॥

ધર્માર્થકામાઃ સમમેવ સેવ્યા
યસ્ત્વેકસેવી સ નરો જઘન્યઃ ।
દ્વયોસ્તુ દક્ષં પ્રવદન્તિ મધ્યં
સ ઉત્તમો યો નિરતિસ્ત્રિવર્ગે ॥ ૩૮॥

પ્રાજ્ઞઃ સુહૃચ્ચન્દનસારલિપ્તો
વિચિત્રમાલ્યાભરણૈરુપેતઃ ।
તતો વચઃ સઙ્ગ્રહવિગ્રહેણ
પ્રોક્ત્વા યવીયાન્વિરરામ ભીમઃ ॥ ૩૯॥

તતો મુહૂર્તાદથ ધર્મરાજો
વાક્યાનિ તેષામ્ અનુચિન્ત્ય સમ્યક્ ।
ઉવાચ વાચાવિતથં સ્મયન્વૈ
બહુશ્રુતો ધર્મભૃતાં વરિષ્ઠઃ ॥ ૪૦॥

નિઃસંશયં નિશ્ચિત ધર્મશાસ્ત્રાઃ
સર્વે ભવન્તો વિદિતપ્રમાણાઃ ।
વિજ્ઞાતુ કામસ્ય મમેહ વાક્યમ્
ઉક્તં યદ્વૈ નૈષ્ઠિકં તચ્છ્રુતં મે ।
ઇહ ત્વવશ્યં ગદતો મમાપિ
વાક્યં નિબોધધ્વમનન્યભાવાઃ ॥ ૪૧॥

યો વૈ ન પાપે નિરતો ન પુણ્યે
નાર્થે ન ધર્મે મનુજો ન કામે ।
વિમુક્તદોષઃ સમલોષ્ટ કાઞ્ચનઃ
સ મુચ્યતે દુઃખસુખાર્થ સિદ્ધેઃ ॥ ૪૨॥

ભૂતાનિ જાતી મરણાન્વિતાનિ
જરા વિકારૈશ્ચ સમન્વિતાનિ ।
ભૂયશ્ચ તૈસ્તૈઃ પ્રતિબોધિતાનિ

મોક્ષં પ્રશંસન્તિ ન તં ચ વિદ્મઃ ॥ ૪૩॥

સ્નેહે ન બુદ્ધસ્ય ન સન્તિ તાનીત્ય્
એવં સ્વયમ્ભૂર્ભગવાનુવાચ ।
બુધાશ્ચ નિર્વાણપરા વદન્તિ
તસ્માન્ન કુર્યાત્પ્રિયમપ્રિયં ચ ॥ ૪૪॥

એતત્પ્રધાનં ન તુ કામકારો
યથા નિયુક્તોઽસ્મિ તથા ચરામિ ।
ભૂતાનિ સર્વાણિ વિધિર્નિયુઙ્ક્તે
વિધિર્બલીયાનિતિ વિત્તસર્વે ॥ ૪૫॥

ન કર્મણાપ્નોત્યનવાપ્યમર્થં
યદ્ભાવિ સર્વં ભવતીતિ વિત્ત ।
ત્રિવર્ગહીનોઽપિ હિ વિન્દતેઽર્થં
તસ્માદિદં લોકહિતાય ગુહ્યમ્ ॥ ૪૬॥

તતસ્તદગ્ર્યં વચનં મનોઽનુગં
સમસ્તમાજ્ઞાય તતોઽતિહેતુમત્ ।
તદા પ્રણેદુશ્ચ જહર્ષિરે ચ તે
કુરુપ્રવીરાય ચ ચક્રુરઞ્જલીન્ ॥ ૪૭॥

સુચારુ વર્ણાક્ષર શબ્દભૂષિતાં
મનોઽનુગાં નિર્ધુત વાક્યકણ્ટકામ્ ।
નિશમ્ય તાં પાર્થિવ પાર્થ ભાષિતાં
ગિરં નરેન્દ્રાઃ પ્રશશંસુરેવ તે ।
પુનશ્ચ પપ્રચ્છ સરિદ્વરાસુતં
તતઃ પરં ધર્મમહીન સત્ત્વઃ ॥ ૪૮॥

॥ ઇતિ ષડ્જગીતા સમાપ્તા ॥

Adhyaya number 161 in shAntiparva, Mahabharata critical edition
(Bhandarkar Oriental Research Institute BORI).
In Kinjavadekar’s edition it is 167.

Sunder Hattangadi

*ShaDjagItA*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*